आरेवतं, क्ली, (आरेवयति निस्तारयति मलं सारकत्वात्। रेव्ट प्लवगतौ। णिच्+विच्॥ अतति। अत+अच्। तत आरेव् चासौ अतश्चेति।) पारावतवृक्षफलं। इति राजनिर्घण्टः॥
("मूलकं शुष्कमाचस्व वर्षाभूः पञ्चमूलकं।
आरेवतफलस्थांषु पक्का तेन घृतं पचेत्"॥
इति सुश्रुतः वैद्यकचक्रपाणिसंग्रहश्च॥)

आरेवतः, पुं, (आरेवयति रेचयति मलं सारकत्वात् आङ्+रेव्+णिच्+विच्+अतच्।) आरग्वधवृक्षः। इत्यमरः॥

आरोग्यं, क्ली, (अरोगस्य भावः। ष्यञ्।) व्याध्यभावः। तत्पर्य्यायः। अनामयं २। इत्यमरः॥ पाटवं ३ लाघवं ४ वार्त्तं ५। इति राजनिर्घण्टः॥ ("आरोग्यं तत् सुखावहं"। इति शार्ङ्गधरः॥
"धर्म्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्"।
"सुखसंज्ञकमारोग्यम्,"
"वेदाध्ययनशब्दाश्च सुखो वायुः प्रदक्षिणः।
पथि वेश्मप्रवेशे तु विद्यादारोग्यलक्षणम्॥"
इति चरकः॥
"सुखमात्रं समासेन सद्वृत्तस्यैतदीरितं।
आरोग्यमायुरर्थौ वा नासद्भिः प्राप्यते नृभिः"॥
इति सुश्रुतः॥)

आरोग्यशाला, स्त्री, (आरोग्यार्था शाला। मध्यपदलोपिकर्म्मधारयः।) आरोग्यदानगृहं। चिकित्सालयः। यथा,—
"धर्म्मार्थकाममोक्षाणामारोग्यं साधनं यतः।
अतस्त्वारोग्यदाता च नरो भवति सर्व्वदः॥
आरोग्यशालां कुर्व्वीत महौषधपरिच्छदां।
विदग्धवैद्यसंयुक्तां बह्वन्नरससंयुतां॥
वैद्यस्तु शास्त्रवित् प्राज्ञो दृष्टौषधपराक्रमः।
ओषधीमूलतत्त्वज्ञः समुद्धरणकालवित्॥
बलवीर्य्यविपाकज्ञः शालिमांसौषधीगणे।
त्यागिवद्देहिनां तद्वदनुकूलः प्रियंवदः"॥
इति वैद्यकं॥

आरोपः, पुं, (आङ्+रुह्+णिच्+घञ्।) मिथ्याज्ञानं। यथा। "असर्पभूते रज्जौ सर्पारोपवत् वस्तुन्यवस्त्वारोपः अध्यारोपः"। इति वेदान्तसारः॥ मिथ्याविष्करणं। यथा। "असूया तु दोषारोपो गुणेष्वपि"। इत्यमरः॥
(यथा साहित्यदर्पणे। १०म परिच्छेदे।
"आरोपाध्यवसानाभ्यां प्रत्येकं ता अपि द्विधा"।
"रूपितं रोपितारोपो विषये निरपह्नवे"॥
"यत्र कस्यचिदारोपः परारोपणकारणं"।)

आरोपणं, क्ली, (आङ्+रुह्+णिच्+ल्युट्।) न्यासः। संस्थापनं। (शस्यादीनां रोपणं। शरासनादौ ज्यादीनां संयोजनं, उन्नमनं, समुत्थापनं, यथा साहित्यदर्पणे। १०म परिच्छेदे।
"यत्र कस्यचिदारोपः परारोपणकारणम्"।
रामायणे। आदिकाण्डे।
"यद्यस्य धनुषो रामः कुर्य्यादारोपणं मुने"।)

आरोपितं, त्रि, (आङ्+रुह्+णिच्+क्तः।) कृतारोपणं। निहितं। न्यस्तं। इति हलायुधः॥ कल्पितं॥ (यथा कुमारसम्भवे ३। ३५।
"तं देशमारोपितपुष्पचापे"। काव्यप्रकाशे।
"समस्तवस्तुविषयं श्रौता आरोपिता यदा"।)

आरोहः, पुं, (आङ्+रुह्+घञ्।) दैर्घ्यं। वरस्त्रियाः श्रोणिः। इत्यमरः॥ (यथा माघे "आरोहैर्निविड़बृहन्नितम्बबिम्बैः"।) अवरोहः। आरोहणं। गजारोहः। समुच्छ्रयः। इति मेदिनी॥ ("आरोहमिव रत्नानां प्रतिष्ठानमिव श्रियः"। इति रामायणे।) परिमाणविशेषः। नितम्बः। इति हेमचन्द्रः॥ (आरोहति यः। आङ्+रुह्+अच्। निषादी। यथा, हरिवंशे,—
"अश्वाश्च पर्य्यधावन्त हतारोहा दिशो दश"।)

आरोहकः, त्रि, (आङ्+रुह्+ण्वुल्।) आरोहणकर्त्ता॥

आरोहणं, क्ली, (आरुह्यतेऽनेन। आङ्+रुह्+ल्युट्।) सोपानं। सिड़ि इति भाषा। (भावे ल्युट्।) समारोहः। नीचादूर्द्ध्वगमनमिति यावत्। (यथा कुमारसम्भवे १। ३९।
"आरोहणार्थं नवयौवनेन
कामस्य सोपानमिव प्रयुक्तम्"।)
प्ररोहणं। अङ्कुरादिजननमिति यावत्। इति मेदिनी॥

आर्किः, पुं, (अर्कस्यापत्यं। अर्क+इञ्।) अर्कपुत्रः। शनैश्चरः। इति ज्योतिःशास्त्रं॥ (वैवस्वतमनुः, सुग्रीवः, कर्णश्च।)

आर्गलः, पुं स्त्री, (अर्गल एव स्वार्थे अण्।) अर्गलः। इति द्विरूपकोषः॥ खिल इति भाषा।

आर्ग्वधः, पुं, आरग्वधवृक्षः। इति शब्दचन्द्रिका॥ ("आरग्वधशब्देऽस्य गुणादयो ज्ञातव्याः"।)

आर्घा, स्त्री, (आङ्+अर्घ्+अच्।) पीता दीर्घतुण्डा षट्पदसन्निभा मक्षिका। इति राजनिर्घण्टः॥

आर्घ्यं, क्ली, (आर्घया मक्षिकया विहितम्। आर्घा+यत्।) आर्घानाममक्षिकोत्पन्नमधु। तस्य गुणाः। अतिशयचक्षुर्हितकारित्वं। कफपित्तास्रदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ (यदुक्तं,—
"मधूकवृक्षनिर्यासं जरत्काव्याश्रमोद्भवाः।
स्रवन्त्यार्घ्यं तदाख्यातं श्वेतकं मालवे पुनः॥
तीक्ष्णतुण्डास्तु याः पीता मक्षिकाः षट्पदोपमाः।
आर्घास्तास्तत्कृतं यत् तदार्घ्यमित्यपरे जगुः"॥
यथा सुश्रुते,—
"आर्घ्यं मध्वतिचक्षुष्यं कफपित्तहरं परं।
कषायं कटु पाके च बल्यं तिक्तमवातकृत्"॥
इदं हि अष्टविधमधुजातिमध्ये परिगणितम्।
"पौत्तिकं भ्रामरं क्षौद्रं माक्षिकं छात्रमेव च।
आर्घ्यमौद्दालिकं दालमित्यष्टौ मधुजातयः"॥)

आर्त्तः, त्रि, (आङ्+ऋ+क्तः।) पीड़ितः। अस्वस्थः। यथा,—
"आर्त्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः।
जानन्तो न प्रयच्छन्ति तेऽपि तद्दोषभागिनः"॥
इति प्रायश्चित्ततत्त्वं॥ (दुःखितः, कातरः, शोकाभिभूतः, उद्वेजितः, विरक्तः, अपकृतः, उत्पीड़ितः। यथा शाकुन्तले, प्रथमाङ्के।
"आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुमनागसि"।
"द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्त्तस्य यथौषधम्"।
इति रघौ। १। २८। (तथा च चरके॥
"नाश्विनावार्त्तं भेषजेनोपपादयेतां"। इति॥

आर्त्तगलः, पुं, (आर्त्तं इव गलति पचाद्यच्।) नीलझिण्टी। तत्पर्य्यायः। बाणः २ बाणा ३ दासी ४ अर्त्तगलः ५। इत्यमरस्तट्टीका च॥
("दासे आर्त्तगलश्च सः"। इति भावप्रकाशः॥)

आर्त्तवं, क्ली, (ऋतुरस्य प्राप्तः, अण् यद्वा ऋतुरेव। प्रज्ञादिभ्यश्चेत्यण्।) स्त्रीरजः। इत्यमरः॥ पुष्पं। इति मेदिनी॥ (यथा मनुः, ३। ४८।
"तस्मात् युग्मासु पुत्त्रार्थी संविशेदार्त्तवे स्त्रियं"।
"नोपगच्छेत् प्रमत्तोऽपि स्त्रियमार्त्तवदर्शने"॥
अथार्त्तवस्य स्वरूपमाह।
स्त्रीणां रस एव मासेनार्त्तवं भवतीत्युक्ता पुनराह सुश्रुत एव।
"मासेनोपचितं काले धमनीभ्यस्तदार्त्तवं।
ईषद्विवर्णदुर्गन्धं वायुर्योनिमुखं नयेत्"॥
गर्भग्रहणयोग्यस्यार्त्तवस्य लक्षणमाह।
"शशासृक्प्रतिमं यच्च यद्वा लाक्षारसोपमं।
तदार्त्तवं प्रशंसन्ति यद्वासो न विरञ्जयेत्"॥
आर्त्तवस्य वर्णद्वयाभिधानं। वातादिप्रकृतिभेदेन वर्णभेदात्। यद्वासो न विरञ्जयेत्। यद्वासो जलं प्रक्षालितं तद्वासस्त्यजति न तु विकृतरक्तं कुर्य्यात्"। इति भावप्रकाशः॥
"मासान्निष्पिच्छदाहार्त्ति पञ्चरात्रानुबन्धि च।
नैवातिबहुलात्यल्पमार्त्तवं शुद्धमादिशेत्॥
गुञ्जाफलसवर्णञ्च पद्मालक्तकसन्निभं।
इन्द्रगोपकसङ्काशमार्त्तवं शुद्धमेव तत्"॥
इति चरकः,—
"शशासृक्प्रतिमं यत्तु यद्वा लाक्षारसोपमं।
तदार्त्तवं प्रशंसन्ति यद्वासो न विरञ्जयेत्॥
विधिमुत्तरवस्त्यन्तं कुर्य्यादार्त्तवशुद्धये॥
स्त्रीणां स्नेहादियुक्तानां चतसृष्वार्त्तवादिषु।
कुर्य्यात् कल्कान् पिचूंश्चापि पथ्यान्याचमनानि च॥
ग्रन्थिभूते पिबेत् पाठां भूषणं वृक्षकाणि च।
दुर्गन्धे पूयसङ्काशे मज्जतुल्ये तथार्त्तवे॥
पिबेद्भद्रश्रियः क्वाथचन्दनक्वाथमेव च"।
"आर्त्तवं शोणितन्त्वाग्नेयमग्नीषोमीयत्वाद्गर्भस्य पाञ्चभौतिकत्वापरजीवरक्तमाङ्करायार्य्याः"॥
"एवं मासेन रसः शुक्रीभवति स्त्रीणाञ्चार्त्तवमिति"॥ इति सुश्रुतः॥)

आर्त्तवः त्रि, (ऋतुः प्राप्तोऽस्य। अण्।) ऋतूद्भवः। इति मेदिनीकरहेमचन्द्रौ॥ यथा रामायणे,
"आर्त्तवान्युपभुञ्जाना पुष्पाणि च फलानि च"
रघौ ८। ३६।
"अभिभूय विभूतिमार्त्तवीं
मधुगन्धातिशयेन वीरुधाम्"।)

आर्त्तवी, स्त्री, वाजिनी। घोटकी। इति राजनिर्घण्टः॥

आर्त्तिः, स्त्री. (आङ्+ऋ+क्तिन्।) पीड़ा। धनुष्कोटिः। इत्यमरटीकायां भरतः॥ रोगः। इति